देशान्तरस्थरजतादिकं तु न इन्द्रियसन्निकृष्टमित्यगत्या तथा कल्प्यते। अतएव श्रुतौ "यत्र द्वैतमिव भवति तदितर इतरत् पश्यतीति" "अथ रथान् रथयोगान् पथः सृजते" इति च जागरे द्वैतस्य इवशब्देन मिथ्यात्वं सूचितम्। स्वप्ने च रथादेः स्पष्टं सृष्टिरुक्ता। तथाच ब्रह्मणि जगदादेरनिर्वचनीयस्य तदज्ञानेनोत्पत्तिः। इयांस्तु विशेषः रजतादेः स्वप्नरथादेश्च प्रतीतिसमकालत्वं, वियदादेस्तु व्यवहारिकत्वम्। "देहात्मप्रत्ययो यद्वत् प्रमाणत्वेन कल्पितः लौकिकं तद्वदेवेदं प्रमाणं त्वात्मनिश्चयादित्युक्तेः व्यवहारकाले वियदादिप्रमेयाणां सत्यत्वं, "परमार्थदृष्ट्या तु मिथ्यात्वमिति" "अन्यदार्त्तमित्यादि" श्रुत्या च ब्रह्मभिन्नानां मिथ्यात्वावगमात्। अधिकमाकरे दृश्यम्।

**अध्यासन** न० अधि+आस–उपवेशे ल्युट्। निवासे। विभ०अव्ययी०। आसने इत्यर्थे अव्य०।

**अध्यासित** त्रि० अधि+आस आधारस्य कर्म्मसंज्ञायां कर्म्मणि क्त। अधिष्ठिते। "धेन्वा तदध्यासितकातराक्ष्येति" रघुः।

**अध्याहार** पु० अध्याह्रियते ज्ञानायानुसन्धीयते अधि+आ+हृ–घञ्। आकाङ्क्षाविषयपदानुसन्धाने, ऊहे, तर्के, अपूर्व्वोत्प्रेक्षणे च। ऊहस्वरूपमूहशब्दे तर्कस्वरूपं च तर्कशब्दे वक्ष्यते। [क्त। अधिष्ठिते स्थानादौ।

**अध्युषित** त्रि० अधि+वस–आधारस्य कर्म्मसंज्ञया कर्म्मणि

**अध्युष्ट्र** त्रि० अधिगतमुष्ट्रं वाहनत्वेन अत्या०स०। उष्ट्रवाहनयुक्ते शकटादौ। (उठगाड़ि)।

**अध्यूढ** त्रि० अधि उपरि ऊढ़ः। अवलम्बनत्वेन उपरिभावेण अवलम्बिते। "तस्मादृच्यध्यूढं साम गीयते" इति छा० उप०। ऋचमवलम्ब्यैव साम्नो गीयमानतया ऋच्यध्यूढ़त्वम्। अधिकऋद्धियुक्ते, समृद्धे च। कृतसापत्निकायां प्रथमायां "यस्या उपरि विवाहान्तरं कृतं" तादृश्यां स्त्रियाम् स्त्री।

**अध्यूध्नी** स्त्री अधिकमूधोयस्याः अनङ् ङीप् च। समृद्धापीनायां धेन्वाम् "अध्यूध्नीं होत्रे प्रयच्छतीति श्रुतिः अवधाध्यूध्नीवनिष्णुषु समुच्चय इति का० १,८,८१।

**अध्येतव्य** त्रि० अधि–इङ कर्म्मणि क्त। पाठ्ये "स्वाध्यायोऽध्येतव्य इति" श्रुतिः। अर्हार्थे तव्य। अध्येतुमर्हे "श्रोतव्यमिह शूद्रेण नाध्येतव्यं कदाचनेति" स्मृतिः।

**अध्येषण** न० अधि–इष–प्रेरणे ल्युट्। सत्कारपूर्व्वकमाचार्य्यादेः प्रेरणे, प्रवर्त्तनमात्रे च। युचि टाप् तस्मिन्नेवार्थे स्त्री। अधिका एषणा प्रार्थना। अधिकप्रार्थने स्त्री।

**अध्रि** त्रि० न–धृ–क्रि। अधृते। न+धृष–ङ्रि, अधृष्ये।

**अध्रिगु** त्रि० अध्रि+गम–कू–डिच्च ऊङादेशो वा। अधृतगमने। "यदध्रिगावोऽध्रिगू इदाचिदह्नो अश्विना" इति ऋ० ८,२२, ११, "अध्रिगावोऽधृतगमना अध्रिगू–अधृतगमनाविति" भा०।

**अध्रिज** त्रि० अध्रिमधृतमधृष्यं वा जनयति जन–अन्तर्भूतण्यर्थे, ड। अधृतजनके अधृष्यजनके च। "इति चिन्मन्युमध्रिज इति ऋ०५,७,१० "अध्रिजः अधृतमन्यैः अग्निव्यतिरिक्तैः अधृष्यं वा जनयिता" इति भा०।

**अध्रुव** त्रि० न०त०। अनिश्चिते, चञ्चले, अस्थिरे च। "योध्रुवाणि परित्यज्य अध्रुवाणि निषेवते। ध्रुवाणि तस्य नश्यन्ति अध्रुवं नष्टमेव हि" इति हितो०।

**अध्रुष** पु० "शोथः स्थूलस्तोददाहप्रकाशी रक्ताज्ज्ञेयः सोऽध्रुषो रुग्ज्वराढ्य इति" सुश्रुतोक्ते विकृतरक्तादिजे ज्वरकारके शोथरोगभेदे।

**अध्वग** पु० अध्वन्+गम–ड। पथिके, अध्वगमनप्रकारश्च विष्णुसंहितायामुक्तः। यथा "नैकोऽध्वानं प्रपद्येत नाधार्म्मिकैः सार्द्धम्, न वृषलैः, न द्विषद्भिः, नातिप्रत्यूषम्, नातिसायम्, न सन्ध्ययोः, न मध्याह्ने, न सन्निहितपानीयम्, नातित्तूर्णम्, न रात्रौ, न सन्तत व्याधितार्त्तैर्वाहनैः, न हीनाङ्गैः, न रोगिभिः, न दीनैः, न गोभिः, नादान्तैः, यवसोदकैर्वाहनानामदत्त्वात्मनः क्षुत्तृष्णापनोदने न कुर्य्यात्। न चतुष्पथमधितिष्ठेत्, न रात्रौ वृक्षमूलम्, न शून्यालयं, न तृणम्, न पशूनां बन्धनागारम्, न केशतुषकपालास्थिभस्माङ्गारान्, न कार्पासास्थि। चतुष्पथं प्रदक्षिणीकुर्य्यात् देवताञ्च। प्रज्ञातांश्च वनस्पतीन्, अग्निब्राह्मणगणिकापूर्णकुम्भादर्शच्छत्रध्वजपताकाश्री वृक्षवर्द्धमाननन्द्यावर्त्तांश्च, तालदन्तचामराग्निगजाजगोदधिक्षीरमधुसिद्धार्थकांश्च, वीणाचन्दनायुधार्द्रगोमयपुष्पशाकगोरोचनादूर्वाप्ररोहांश्च, उष्णीषालङ्कारमणिकनकरजतवस्त्रासनयानामिषांश्च, भृङ्गारोद्धृतोर्व्वरारज्जुबद्धपशुकुमारीमीनांश्च दृष्ट्वा प्रायादिति। मत्तोन्मत्तव्यङ्गान् दृष्ट्वा निवर्त्तेत वान्तविविक्तमुण्डमलिनवसनजटिलवामनांश्च, कषायिप्रव्रजितमलिनांश्च, तैलगुड़शुष्कगोमयेन्धनतृणकुशपलाशभस्माङ्गारांश्च, लवणक्लीवासवनपुंसककार्पासरज्जुनिगड़मुक्तकेशांश्च, वीणाचन्दनार्द्रकाशोष्णीषालङ्करणकुमारीः प्रस्थानकालेऽभिवन्द्येदिति। देवब्राह्मणगुरुदीक्षितानां छायां नाक्रामेत्,